श्रीगणेशाय नमः॥ गुरुभ्यो नमः॥ महागणपतये नमः॥ अथांतरित
संस्काराणां तंत्र प्रयोगः॥ कर्ता चंम्य॥ प्राणानायंम्य॥ देशकालौ सं
कीर्त्य॥ अस्य कुमारस्य उपनयनात्प्राकू अंतरितान् संस्कारान् गर्भा
धानपुंसवनसीमंतोन्नयनजातकर्मनामकरणांनप्राशनांत संस्काराणां
स्वस्वकाले अकरणेन जनितस्य प्रत्यवायस्य परिहारद्वारा श्रीपरमेश्वर
प्रीत्यर्थं प्रतिसंस्कारं गोऽन्नत्याम्नायरजतनिष्कपादपादपरिमितं प्राय
श्चितं॥ अमुकशर्मणः पुत्रस्य चौलसंस्कारस्वकाले अकरणेन जनितस्य
प्रत्यवायस्य परिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं अर्धकृच्छ्रप्रायश्चितं च क्र
मेण अहमाचरिष्ये॥ श्रीपरमेश्वरप्रीत्यर्थं कृतसंकल्पितप्रायश्चित्ती
यद्रव्यं ब्राह्मणाय दातुमहमुत्सृज्ये॥ श्रीपरमेश्वरप्रीत्यर्थं अस्य कुमार
रा स्य बीजगर्भसमुद्भवएनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं गर्भाधाना
दं व्यकर्म॥ तथा॥ अस्य कुमारस्य बीजगर्भसमुद्भवएनोनिबर्हणद्वारा श्री

रा
१
च

परमेश्वरप्रीत्यर्थं पुंसवनाख्यं कर्म ॥ अस्य कुमारस्य बैजिकगार्भिकदोष
निबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं सीमंतोन्नयनाख्यं कर्म ॥ तथा ॥ अस्य कु
मारस्य गर्भांबुपानजनितदोषनिबर्हणबीजगर्भसमुद्भवएनोनिबर्हणद्वारा
आयुर्वर्चोभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातसंस्काराख्यं कर्म ॥ तथा ॥
अस्य शिशोः बीजगर्भसमुद्भवएनोनिबर्हायुर्वर्चोभिवृद्धिव्यवहारसिद्धिद्वा णा
रा श्रीपरमेश्वरप्रीत्यर्थं नामकरणाख्यं कर्म ॥ तथा ॥ ममास्य शिशोः मातृगर्भ
मलप्राशनशुद्धिबीजगर्भसमुद्भवैनोनिबर्हणअन्नाद्य ब्रह्मवर्चसतेजआ
युरिंद्रियाभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं अन्नप्राशनाख्यं कर्म चाद्य ॥ त
था ॥ अस्य कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणद्वारा आयुर्वर्चोभिवृद्धिद्वा
रा च श्रीपरमेश्वरप्रीत्यर्थं चूडाकरणाख्यं कर्म ॥ तथा ॥ ममास्यामुकनाम्नः
पुत्रस्य द्विजत्वसिद्धिपूर्वक वेदाध्ययनाधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्य
र्थं आचार्यपेत सावित्रीमात्रकसंस्काररूपमुपनयनाख्यं कर्म तंत्रः तंत्रेण

॥ १ ॥

करिष्ये ॥ अद्य पूर्वो० स्मर्थं गर्भाधानादि अन्नप्राशनांतसंस्काराणां विहितह
वनं कर्तुं स्थंडिलादि सकलं कर्म करिष्ये ॥ तदंगं गणपतिपूजनं करिष्ये ॥ उद्धननं
भूसंस्कारं विधाय तत्राग्निं प्रतिष्ठाप्य ॥ मारुतपवमान मंगल प्रबल पार्थिव
शुचि नामाग्निं प्रतिष्ठापयामि ॥ चत्वारिश्रृंगेति वरदो भव ॥ गर्भाधानादि
अन्नप्राशनांतसंस्काराणां होमकर्मणां देवतापरिग्रहार्थं मन्वाधानं करि
ष्ये ॥ समित्त्रयमादाय यथा इह एही स्यादि प्राणायामांतं कृत्वा ॥ गर्भाधानादि
अन्नप्राशनांतसंस्काराणां होमकर्मणां यायक्ष्यमाणा देवतास्ताः सर्वाः
परिग्रहीष्यामीत्यादि व्याहृत्यंतमुक्त्वा ॥ वैशेषिकप्रधानहोमः ॥ धातारं
चतुः ॥ अनुमतिं चतुः ॥ राकां द्विः ॥ सिनीवालीं द्विः ॥ कुहूं चाज्येन ॥ अंग
होमे ॥ वरुणं द्विरित्यादि संस्रावेणेत्यंतमुक्त्वा समिधोग्नावाधाय व्या
हृत्यंतमुक्त्वा ॥ वैशेषिकहोमः ॥ धाता ददातु नो रयिमीशानो जगतस्पतिः ॥
स नः पूर्णेन वावनत् स्वाहा ॥ धात्र इदं ॥ धाता प्रजाया उत राय ईशे धाते

दं विश्वं भुवनं जजान ॥ धाता पुत्रं यजमानाय दाता नौ हव्यं घृतवद्विधेम स्वा स्वा
हा ॥ धात्र इदं ॥ धाता ददातु नो रयिं प्राचीं जीवातु मक्षितां ॥ वयं देवस्य धीम
हि सुमतिं सत्यराधसः स्वाहा ॥ धात्र इदं ॥ धाता ददातु दाशुषे वसूनि प्रजाका
माय मीढुषे दुरोणे ॥ तस्मै देवा अमृताः सव्ययंतु विश्वे देवासो अदितिः सजोषा
स्वाहा ॥ धात्र इदं ॥ अनु नो घानुमतिर्यज्ञं देवेषु मन्यतां ॥ अग्निश्च हव्यवाह
नो भवतां दाशुषे मय स्वाहा ॥ अनुमत्या इदं ॥ अन्विदनुमते त्वं मन्यासै शंच
नस्कृधि ॥ क्रत्वे दक्षाय नो हिनु प्रण आयूंषि षिरीरिषः स्वाहा ॥ अनुमत्या इदं ॥
अनुमन्यतामनुमन्यमाना प्रजावंतं रयिमक्षीयमाणं ॥ तस्यै वयं हेडसि
मापि भूम सा नो देवी सुहवा शर्म यच्छतु स्वाहा ॥ अनुमत्या इदं ॥ अनुस्या मिदं
मनुर्विमनीषिपादि रोन तेनु मतिं प्रति भूषं न्या यवेन ॥ यस्यामुरस्थ्य
उर्वंतरिक्षं सा नो देवी सुहवा शर्म यच्छतु स्वाहा ॥ अनुमत्या इदं ॥ राकामहं सुहवां सुष्टु
ती हुवे शृणोतु नः सुभगा बोधतु त्मना ॥ सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदा
यमुक्थ्यं स्वाहा ॥ राकाया इदं ॥ यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दा
शुषे वसूनि ॥ ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा स्वाहा ॥
राकाया इदं ॥ सिनीवालि पृथुष्टुके या देवानामसि स्वसा ॥ जुषस्व हव्यमाहुतं
प्रजां देवि दिदिड्ढि नः स्वाहा ॥ सिनीवाल्या इदं ॥ या सुपाणिः स्वंगुरिः सुषू
मा बहुसूवरी ॥ तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन स्वाहा ॥ सिनी
वाल्या इदं ॥ कुहूमहं सुभगां विद्मनापसमस्मिन्यज्ञे सुहवां जोहवीमि ॥
सा नो ददातु श्रवणं पितॄणां तस्यास्ते देवि हविषा स्वाहा ॥ कुह्वा इदं ॥ द्वितीयम
इदं ॥ इममे वरुणेत्यादि नलीकरणांतं मौप्य ॥ तत्र संस्कार प्रधानानि क्र
मेण ॥ विष्णुर्योनिं क० तु ॥ आसिं चतु प्रजाप० ॥ ते ॥ गर्भं धेहि० गर्भं
ते० ॥ जौ ॥ हिरण्य० तं ते० वे ॥ यथाग्नि० वायुर्य० मिते ॥ यस्य योनि० नमा
ता० स्वानां ॥ आ ते गर्भो० ॥ आ वीरो० मास्यः ॥ करोमि ते० अनूनः पूर्णो०
धीरः ॥ यानि प्रभू० ते स्त्वं गर्भि० स्वानां ॥ यो वज्राया० नेन त्व० भव ॥ सं

२ प

स

॥ ३ ॥

न्नाम्नु॰ संत्वाकाम॰ चनाया॥ चाक्रवाकं॰सं॰ यद्युक्तोदे॰ सुकः॥ स्वः प्र
जापतिना त्वर्षभेणस्कंदयामि॥ वीरं धत्स्वांसौ॥ भुवः प्रजापतिना॰॥
सुवः प्र॰॥ पुंसवनं॥ वृषासि॥ आं ओ स्थः॥ श्वावृतत्॥ अग्निष्ठाहं दशमि॰॥
सूतवै॥ सीमंतोन्नयनं॥ तस्याः पुरस्तात्प्रत्यङ्मुखस्तिष्ठन्॥ सीमंतमुन्न
येत्॥ ॐ भूर्भुवः सुवः॥ राकामहं॰ सुह॰ सीव्यत्वपः स्त॰ मुक्थ्य॥ यास्ते राके॰
ताभिर्नो अद्य सु॰ गेररराणा॥ सोम एव॰ गंगे॥ विश्वा उत्त॰ अतिगाहे महिद्धि
षः॥ जातकर्म॥ अश्माभव॰ वेदो वै॰ जीवत्व॰ शरदः शतं॥ अंगादंगा॰ आ
त्मा वै॰ सजीव॰ शतं॥ तिलदेवपयस्त्व॥ अस्य कुमारस्य शंडोमर्कादिरक्षो
गणेभ्यः संरक्षणार्थं सर्षपमिश्रैः कणैः सायंप्रातरुद्धूपनं भूम्यालंभनं च
करिष्ये॥ अथ मंत्राः॥ शंडोमर्क॰ च्यवनो॰ दितः स्वाहा॥ १॥ नात्र त्यागः॥ ॥ ३ ॥
आलिखन्न॰ पस्तुतिः स्वाहा॥ २॥ अर्यम्णः कुं॰ निपुणिः स्वाहा॥ ३॥ आंत्रीमुखः
प॰ दितः स्वाहा॥ ४॥ केशिनीश्व॰ अपेत॰ स्वाहा॥ ५॥ कौबेरक॰ ग्रामा

त्स॰ कृतान् स्वाहा॥ ६॥ एता हुतैतीन्व॰ लंषस्तुनात्स्महा॥ ७॥ नक्तं चारिण॰
पान्स्वाहा॥ ८॥ पूर्व लप्सो॰ मा तान् जुघ॰ मिछंतीः स्वाहा॥ ९॥ नक्तं चारिणीस्त्व॰
यास्वपत्सु॰ मनस्वाहा॥ १०॥ तासां त्वं कृष्णव॰॥ अग्नेय॰ हः स्वाहा॥ ११॥ ततः पा
णिप्रक्षाल्य॥ यत्ते सुशीमे॰ तस्यामृतत्वं॥ वेद ते भूमि॰ तथामृतत्व॰ रुदं॥ मेधा
जननं॥ देशकालौ॰ स्यर्थं॥ अस्य कुमारस्य धियो धारणाद्यभिवृद्ध्यर्थं मेधाजननं
करिष्ये॥ दर्भेण हिरण्यं प्रबध्य तदंतर्धार्य प्राक्शिरसं कुमारं संस्थाप्य गोघृतं
प्राशयेत्॥ तत्र मंत्राः॥ भूरृचः स्त्वयि जुहोमि स्वाहा॥ भुवो यजूंषि त्वयि जुहोमि स्वा
हा॥ सुवः सामानि त्वयि जुहोमि स्वाहा॥ भूर्भुवः सुवरथर्वांगिरसस्त्वयि जुहोमि स्वा
हा॥ ततः कुमारमुष्णशीताभिरद्भिः स्नापयति॥ क्षेत्रियै त्वा॰ अनागसं॰ इमे॥ शं
ते अग्निः स॰ शमंत॰ प्रदिशो भवतु॥ सूर्यमृतं॰ एवमहं॰ पाशात्॥ या दैवी॰ ता
सां ता॰ पराचैः॥ मा ते पुत्रं॰ रक्षो॰ प्रियाधन॰ वृशाः॥ अयं कुमारो॰ तस्मै स्तनं॰
लं॰ नामयति॥ म॰ शामासि॥ आयो गृहे॰ एवमस्मे॰ गतः॥ नामकर्म॥ तत्रायं

शिष्टाचारः ॥ तंडुलान्कास्यादि पा[illegible] प्रसार्य तदुपरि सुवर्णशलाकया लिखेत् ॥
प्रथमं कुलदेवतानाम ॥ द्वितीयं मासनाम ॥ तृतीयं नाक्षत्रं चतुर्थं व्यवहा
रिकं ॥ ततः कुलदेवतानाम्ना महालक्ष्मीभक्तोसि ॥ मासनाम्ना ॥ कृष्णोसि ॥ नाक्षत्रे
णनाम्ना ॥ अमुकोसि ॥ व्यवहारिकेणनाम्ना ॥ अनंतोसि ॥ नर्यप्रजांमे० ष्टिता ॥
विप्रैः ॥ सुप्रतिष्ठितिमस्तु ॥ त्वं कुलदेवतानाम्नामहालक्ष्मीभक्तोयं भवतः सर्वा
न्ब्राह्मणानभिवादयते ॥ आयुष्मान्भवतु ॥ महालक्ष्मीभक्तः ॥ अस्मैमहाल
क्ष्मीभक्ताय पुण्याहं भवंतो ब्रुवंतु ॥ द्विस्त्रिः ॥ एवं स्वस्ति मृद्धिमिति ॥ त्वं मास
नाम्ना ॥ कृष्णोयं भवतः ॥ सर्वान्ब्राह्मणानभिवादयते ॥ आयुष्मान्भवतु ॥
कृष्णः ॥ अस्मै कृष्णाय पुण्याहं० एवं स्वस्ति मृद्धि० ॥ नर्यप्रजां० तां ॥ व्यवहारि
केणनाम्ना ॥ अनंतोयं भवतः ॥ सर्वा० आयुष्मा० अनंतः ॥ अस्मै अनंताय पु
ण्याहं० एवं स्वस्ति मृद्धि ॥ ततो नीराजनं कारयित्वा ॥ अन्नप्राशनं ॥ ततः स्व
दक्षिणे मातुरुत्संगस्थं शिशुं दधिमधुघृतमिति ॥ त्रिः स्त्रिश्नं कृत्वा मंत्रेण